# Sharadabhujangaprayatashtakam

# શારદાભુજઙ્ગપ્રયાતાષ્ટકમ્

## Document Information

```
Text title : shaaradaabhuja.ngaprauaataashhTakaM
File name : shaaradaabhuja.itx
Category : devii, sarasvatI, bhujanga, shankarAchArya, devI, aShTaka
Location : doc_devii
Author : Popular stotra
Transliterated by : Savithri D. savdev at hotmail.com
Proofread by : Savithri D. savdev at hotmail.com
Latest update : June 24, 2000
Send corrections to : Sanskrit@cheerful.com
```

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 21, 2020

*sanskritdocuments.org*

# શારદાભુજઙ્ગપ્રયાતાષ્ટકમ્

સુવક્ષોજકુમ્ભાં સુધાપૂર્ણકુંભાં
    પ્રસાદાવલમ્બાં પ્રપુણ્યાવલમ્બામ્ ।
સદાસ્યેન્દુબિમ્બાં સદાનોષ્ઠબિમ્બાં
    ભજે શારદામ્બામજસ્રં મદમ્બામ્ ॥ ૧॥

કટાક્ષે દયાર્દ્રાં કરે જ્ઞાનમુદ્રાં
    કલાભિર્વિનિદ્રાં કલાપૈઃ સુભદ્રામ્ ।
પુરસ્ત્રીં વિનિદ્રાં પુરસ્તુઙ્ગભદ્રાં
    ભજે શારદામ્બામજસ્રં મદમ્બામ્ ॥ ૨॥

લલામાઙ્કફાલાં લસદ્ગાનલોલાં
    સ્વભક્તૈકપાલાં યશઃશ્રીકપોલામ્ ।
કરે ત્વક્ષમાલાં કનત્પ્રત્નલોલાં
    ભજે શારદામ્બામજસ્રં મદમ્બામ્ ॥ ૩॥

સુસીમન્તવેણીં દૃશા નિર્જિતૈણીં
    રમત્કીરવાણીં નમદ્વજ્રપાણીમ્ ।
સુધામન્થરાસ્યાં મુદા ચિન્ત્યવેણીં
    ભજે શારદામ્બામજસ્રં મદમ્બામ્ ॥ ૪॥

સુશાન્તાં સુદેહાં દૃગન્તે કચાન્તાં
    લસત્સલ્લતાઙ્ગીમનન્તામચિન્ત્યામ્ ।
સ્મરેત્તાપસૈઃ સઙ્ગપૂર્વસ્થિતાં તાં
    ભજે શારદામ્બામજસ્રં મદમ્બામ્ ॥ ૫॥

કુરઙ્ગે તુરઙ્ગે મૃગેન્દ્રે ખગેન્દ્રે
    મરાલે મદેભે મહોક્ષેઽધિરૂઢામ્ ।
મહત્યાં નવમ્યાં સદા સામરૂપાં
    ભજે શારદામ્બામજસ્રં મદમ્બામ્ ॥ ૬॥

જ્વલત્કાન્તિવહ્નિં જગન્મોહનાઙ્ગીં
  ભજે માનસામ્ભોજસુભ્રાન્તભૃઙ્ગીમ્ ।
નિજસ્તોત્રસઙ્ગીતનૃત્યપ્રભાઙ્ગીમ્
  ભજે શારદામ્બામજસ્રં મદમ્બામ્ ॥ ૭॥

ભવામ્ભોજનેત્રાજસમ્પૂજ્યમાનાં
  લસન્મન્દહાસપ્રભાવક્ત્રચિહ્નામ્ ।
ચલચ્ચઞ્ચલાચારુતાટઙ્કકર્ણાં
  ભજે શારદામ્બામજસ્રં મદમ્બામ્ ॥ ૮॥

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યસ્ય
શ્રીગોવિન્દભગવત્પૂજ્યપાદશિષ્યસ્ય
શ્રીમચ્છઙ્કરભગવતઃ કૃતૌ
શારદાભુજઙ્ગપ્રયાતાષ્ટક સમ્પૂર્ણમ્ ॥

Savithri D savdev at hotmail.com

*Sharadabhujangaprayatashtakam*
pdf was typeset on August 21, 2020

Please send corrections to *sanskrit@cheerful.com*